मध्ये सूक्ष्मा नियताः मातापितृजा निवर्त्तन्ते कीटान्ता वा भस्मान्ता वा विड़न्ता वेति” त॰ कौ॰ ।

**त्रिधासर्ग** पु॰ त्रिकारः सर्गः । १भूतादिसर्गे । “अष्टविकल्पो दैवस्तैर्य्यग्योनश्च पञ्चधा भवति । मानुषश्चैकविधः समासतोऽयं त्रिधासर्गः” सां॰का॰। “ब्राह्मः प्राजापत्यः ऐन्द्रः पैत्रः गान्धर्वः याक्षः राक्षसः पैशाच इत्यष्टविकल्पो दैवः सर्गः। पशुमृगपक्षिसरीसृपस्थावरा इति पञ्चविधस्तैर्य्यग्योनः सर्गः। मानुष्यश्चैकविधः ब्राह्मणाद्यवान्तरजातिभेदाविवक्षया संस्थानस्य चतुर्ष्वपि वर्णेष्वविशेषात्” सा॰त॰कौ॰।

**त्रिनयन** पु॰ त्रीणि नयनानि यस्य “पूर्वपदात् संज्ञायामगः” पा॰ णत्वे प्राप्ते क्षुभ्ना॰ पाठात् न णत्वम् । १महादेवे “योग्यस्य त्रिनयनलोचनार्च्चिः” “शोभां शुभ्रत्रिनयनहृषोत्खातपङ्कोपमेयाम्” माघः । २पार्वत्यां स्त्री “लोचनत्रयसंयुक्तां पूर्णेन्दुसदृशाननाम्” तद्ध्याने तस्या नेत्रत्रयोक्तेः।३लोचनत्रययुक्ते त्रि॰ “बिभ्राणां विशदप्रभां त्रिनयनां वाग्देवतामाश्रये” मातृकासरस्वतीध्यानम् । त्रिनेत्रत्रिलोचनादयोऽप्यत्र । इयांस्तु भेदः त्रिनेत्रशब्दस्य महादेवपरत्वे संज्ञात्वात् पूर्वपदात् णत्वे प्राप्ते गिरिनद्या॰ वा नत्वम् । अन्यत्र न णत्वमिति । शिवस्य तृतीयनेत्राविर्भावकथा भा॰ अनु॰ १० १४० । यथा

“सेवन्ती हिमवत्पार्श्वं हरपार्श्वमुपागमत् । ततः स्मयन्ती पाणिभ्यां नर्म्मार्थं चारुदर्शना । हरनेत्रे शुभे देवी सहसा सा समावृणोत् । संवृताभ्यान्तु नेत्राभ्यां तमो भूतमचेतनम् । निर्होमं निर्वषट्कारं जगद्वै सहसाऽभवत् । जनश्च विमनाः सर्वो भयत्राससमन्वितः । निमीलिते भूतपतौ नष्टसूर्य्य इवाभवत् । ततो वितिमिरो लोकः क्षणेन समपद्यत । ज्वाला च महती दीप्ता ललाटात्तस्य निःसृता । तृतीयञ्चास्य सम्भूतं नेत्रमादित्यसन्निभम्” इत्युपक्रमे उमोवाच “भगवान् सर्वभूतेश ! शूलपाणे ! महाव्रत ! संशयो मे महान् जातस्तन्मे व्याख्यातुमर्हसि । किमर्थं ते ललाटे वै तृतीयं नेत्रमुत्थितम् । किमर्थञ्च गिरिर्दग्धः सपक्षिगणकाननः । किमर्थञ्च पुनर्देव ! प्रकृतिस्थस्त्वया कृतः । तथैव द्रुमसंच्छन्नः कृतोऽयं तु पिता मम” महेश्वर उवाच ।“नेत्रे मे संवृते देवि ! त्वया बाल्यादनिन्दिते । नष्टालोकस्तथा लोकः क्षणेन समपद्यत । नष्टादित्ये तथा लोके तमोभूते नगात्मजे ! । तृतीयं लोचनं दीप्तं सृष्टं मे रक्षता प्रजाः । तस्य चाक्ष्णो महत्तेजो येनायं मथितो गिरिः । त्वत्प्रियार्थञ्च मे देवि ! प्रकृतिस्थः पुनः कृतः”। दुर्गायाः त्रिनयनाशब्दवाच्यत्वे हेतुर्देवीपु॰ ४५ अ॰ उक्तो यथा

“पक्षिणां चोत्तरं लोकं तथा ब्रह्मायनं परम् । नयं सन्मार्गधर्मत्वं दृष्टौ त्रिनयना मता” देवीपु॰ ४५ अ॰ । “पञ्चवक्त्रं त्रिनेत्रम्” शिवध्यानम् । “निजत्रिनेत्रत्वावतरत्वबोधिकाम्” नैष॰ साध्यगणभेदानां त्रिनेत्रत्वं मत्स्यपु॰ उक्तं यथा “ततः साध्यगणानीशस्त्रिनेत्रानसृजत् पुनः । कोटयश्चतुरशीतिर्जरामरणवर्जिताः । कामं सृजन्नमर्त्यांस्तान् ब्रह्मणा विनिवारितः । नैवं विधा भवेत् सृष्टिर्जरामरणवर्जिता” ।

**त्रिनवति** स्त्री त्र्यधिका नवतिः शा॰ त॰ । १त्र्यधिकनवतिसंख्यायां २तत्संख्येये च । ततः पूरणे डट् । त्रिनवत तत्संख्यापूरणे त्रि॰ तमप् वा । त्रिनवतितम तत्संख्यापूरणे त्रि॰ स्त्रियामुभयतो ङीप् । पक्षे त्रयआदेशे त्रयोनवत्यादयोऽप्यत्र । तत्रायं भेदः “संख्या” पा॰ त्रिनवत्यादौ पूर्वपदे प्रकृतिस्वरः । त्रय आदेशोऽन्तोदात्त इति ।

**त्रिनाक** पु॰ नास्ति अकं दुःखं यस्मिन् नाकं पुण्यलोकः । तृतीयं नाकं वृत्तिविषये संख्याशब्दस्य पूरणार्थत्वात् । १तृतीये नाके २उत्तमस्थाने च । “यत्रानुकामं चरणं त्रिनाके” ऋ॰ ९।११३।९ । “तावत्त्रिनाकं नहुषः शशास” भाग॰ ६।१३।१३ श्लोकः ।

**त्रिनाभ** पु॰ त्रयो लोका नाभौ यस्य अच् समा॰ । विष्णौ “त्रिनाभाय त्रिपृष्ठाय शिपिविष्टाय विष्णवे” भा॰ ८।१७।०। विष्णुस्तुतौ ।

**त्रिनिष्क** त्रि॰ त्रिभिर्निष्कैः क्रीतम् ठञ् तस्य वा लुक् । त्रिभिर्निष्कैः क्रीते लुगभावे ठञि उत्तरपदस्य वृद्धिः । त्रिनैष्किक तत्रार्थे त्रि॰।

**त्रिनेत्रचूड़ामणि** पु॰ ६त॰ । चन्द्रे त्रिका॰ ।

**त्रिपक्ष** पु॰ तृतीयः पक्षः संख्याशब्दस्य वृत्तौ पूरणार्थत्वात् । तृतीये पक्षे “षष्ठे मासि त्रिपक्षे वा” स्मा॰ त॰ ।

**त्रिपञ्च** त्रि॰ ब॰ व॰ । त्रिगुणिताः पञ्च । पञ्चदशसंख्यान्विते “त्रिपञ्चारे पीठे” कर्पूरस्तवः ।

**त्रिपञ्चाङ्ग** पु॰ त्रिपञ्च पञ्चादशाङ्गान्यस्य । समाधिभेदे तदङ्गानि च “यमो हि नियमस्त्यागो मौनं देशः सुकालता । आसनं मूलबन्धश्च देहसाम्यञ्च दृक्स्थितिः । प्राणसंयमनञ्चैव प्रत्याहारश्च धारणा । आत्मध्यानं समाधिश्च प्रोक्तान्यङ्गानि वै क्रमात्” शब्दार्थचि॰ धृतवाक्योक्तानि ।